International Journal of Sanskrit Research 2024; 10(2): 241-245

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(2): 241-245
© 2024 IJSR
www.anantaajournal.com
Received: 10-03-2024
Accepted: 12-04-2024

**दीपक कुमार झा**
गवेषकः, धर्मशास्त्रविभागः,
कामेश्वरसिंहदरभङ्गासंस्कृत
विश्वविद्यालयः, दरभंगा, बिहार,
भारत

**डॉ० पुरेन्द्रवारिकः**
प्राचार्यः, स्नातकोत्तरधर्मशास्त्रविभागः,
कामेश्वरसिंहदरभङ्गासंस्कृत
विश्वविद्यालयः, दरभंगा, बिहार,
भारत

Corresponding Author:
**दीपक कुमार झा**
गवेषकः, धर्मशास्त्रविभागः,
कामेश्वरसिंहदरभङ्गासंस्कृत
विश्वविद्यालयः, दरभंगा, बिहार,
भारत

# मिताक्षरायाः दायभागांश–दायसारयोस्तुलनात्मकमध्ययनम्

**दीपक कुमार झा, डॉ० पुरेन्द्रवारिकः**

**प्रस्तावना**

मिताक्षरायाः दायभागांशदायसारयोः ग्रन्थद्वययोः तुलनात्मकमध्ययनं विषयः विचार्यते। प्रथमं तावत् विज्ञानेश्वर–कृतायाः मिताक्षरायाः दायभागांशस्य विषयाः प्रतिपाद्यन्ते, तदनन्तरं महामहोपाध्यायमहेशठक्कुरस्यकृत दायसारग्रन्थस्य विषयाः प्रतिपाद्यन्ते।

तत्रादौ विज्ञानेश्वरो दायशब्दस्य लक्षणं प्रतिपादयति तेन उक्तं- 'दायशब्देन यद्धनं स्वामी–सम्बन्धादेव निमित्तादन्यस्य स्वं भवति तदुच्यते'[1]

अर्थात् स्वामीसम्बन्धमात्रात् एव अन्ये सम्बन्धाधिक्येने निमित्तेन अन्यस्य यत् स्वं नाम धनं भवति स एव 'दायः' शब्देन उच्यते। अयमेव मिताक्षराकारस्य विज्ञानेश्वरस्य अभिप्रायः।

'दा' धातौ भावे ल्यूट् प्रत्यये 'घञ्' प्रयोगे च 'दाय' शब्दः निष्पद्यते। दीयते इति दानं वा दायः भवति। दाने स्वस्वत्वस्य ध्वंसः भवति परस्य स्वत्वं जायते यथा पितुः धने पुत्रस्य अधिकाराः स च 'दायः' विज्ञानेश्वरमतानुसारं द्विविधः, प्रथमः 'अप्रतिबन्धदायः' तत् लक्षणं विज्ञानेश्वरेण कृतं यथा-पुत्राणां पौत्राणां च पुत्रत्वेन च पौत्रत्वेन पितृधनं च पितामहधनं च स्वं भवति इति 'अप्रतिबन्धदायः'। द्वितीयः 'दायः' भवति 'सप्रतिबन्धदायः' तत्लक्षणं अपि तेन कृतं यथा-पितृव्यभ्रातादीनाम् तु पुत्राभावे स्वाम्यभावे च स्वं भवति इति 'सप्रतिबन्धदायः'।

एवं प्रकारेण दायस्य भेदः तस्य लक्षणं च प्रदर्श्य 'विभाग' लक्षणं कृतं यथा-विभागो नाम "द्रव्यसमुदायविषयानामनेकस्वाम्यानां तदेकदेशेषु व्यवस्थापनं" इति।[2] विशेषेण भजनं स्वत्वं ज्ञापनं विभागः। 'वि' उपसर्गात् 'भज्' खण्डने इति अस्मात् धातोः विभागशब्दः निष्पद्यते। अर्थात् जन्मना पुत्रपौत्रादीनां पैतृकधने स्वत्वं नाम अधिकारः सामान्यं प्रवर्तते।

अतः "यथेष्ठविनियोगार्हत्वलक्षणालक्षितस्य स्वत्वस्य समुदयात् द्रव्यात् आकृष्य द्रव्यविशेषेषु येन विधिना व्यवस्थापनं क्रियते स विधिः 'विभागः' इति उच्यते। अयं 'विभाग' शब्दः यौगिकः इति विज्ञानेश्वरस्य अभिप्रायः। 'दायविभाग' लक्षणे नारदमतं उद्धृत्य विज्ञानेश्वरेण कथितम्–

विभागोऽर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते।
दायभाग इति प्रोक्तं तद्विवादपदं बुधैः ॥[3]

स्वत्वं विभागात् भवति अथवा स्वस्य सतो विभागः इति प्रसङ्गे विज्ञानेश्वेरेण प्रथमं तावत् स्वत्वं निरूपयति। अत्र संदेहः जायते स्वत्वं शास्त्रैकसमधिगम्यं अथवा लौकिकं। तत्र शास्त्रैकसमधिगम्यं

इति पक्षं आश्रित्य विज्ञानेश्वरेण गौत्तमवचनमुद्धृतं यथा-स्वामीरिक्थक्रयसंविभागपरिग्रहादिगमेषु ब्राह्मणस्याधिकं लब्धं, क्षत्रियस्य विजितं, निर्विष्टं वैश्यशूद्रयोः।[4]

अत्र गौतमवचनस्य व्याख्या भवति रिक्थंनाम 'अप्रतिबन्धदायः' यथा-पुत्राणां पौत्राणां च पुत्रत्वेन पौत्रत्वेन च पितृधने पितामहधने दानाद्यतिरेकेण यत् स्वं भवति वा धनं। इत्युक्तं 'अप्रतिबन्ध–दायः'।

'क्रयः' नाम समुचितमूल्येन दानेन द्रव्यस्वीकारः। संविभाग नाम सप्रतिबन्धदायः। तस्य विभागः अर्थात् पितृव्य धने तत् पुत्राद्याभावे भ्रातृपुत्रादिषु अधिकारः भवति। परिग्रहः नाम अनन्य– साधारणस्य अरण्यादेः तृणकाष्ठादेः वा प्रथमं मामति स्वबुध्या ग्रहणं। अधिगमपदेन प्रनष्टस्वामीकस्य निध्यादेः प्राप्तिः। गौतमोक्ताः रिक्थादयः सर्वेषां ब्राह्मणक्षत्रियादिवर्णानां कृते प्रतिपाद्य असाधारणस्वत्वं हेतवः भवन्ति इति। प्रतिपाद्यासाधारणस्वत्वज्ञानार्थं वर्णविशेषस्य कृते प्रतिग्रहादिना ब्राह्मणस्य अधिकलब्धं इति। क्षत्रियवर्णस्य धर्मयुद्धार्जितं अधिकं। निर्विष्टं वैश्यशूद्रयोः इति वैश्यस्य कृषिः, वाणिज्यादिना, शूद्रवर्णस्य दासवृत्या भृतिसदृशं विवक्षितम्।

प्रमाणानन्तरगम्ये स्वत्वे इदं गौतमवचनं अर्थवत् स्यात्। इदं गौतमवचनं स्वत्वनिमित्तं प्रकल्पितां। अतः स्वत्वं शास्त्रैकसमधिगम्यं इति नास्ति संदेहः। यदि स्वत्वं शास्त्रीयं न स्यात् तर्हि इदं मनुवचनं याऽदत्तादायिनो हस्ताल्लिप्सेत ब्राह्मणो धनम्। योजनाध्यापनेनापि यथास्तेनस्तथैव सः॥ न संगच्छते यतोहि शास्त्रीयत्वाभावात् याजनाध्यापनादिवैधकर्मणि गृहीते धने दोषाभावः प्रसज्जते। अतः विज्ञानेश्वेरेण स्वत्वस्य लौकिकत्वं स्वीक्रियते। लौकिकार्थक्रियासाधनत्वात् ब्रिहादिवत् आहवनीयादिनांहि शास्त्रगम्यानां न लौकिकक्रियासाधनत्वं अस्ति तथैव स्वत्वस्य शास्त्रैकसमधिगम्यत्वे अपि लौकिक–व्यवहार्यात्त्वात् तस्य लौकिकत्वं स्वीकार्यं इति। अपि च प्रत्यंतवासिनामदृष्टशास्त्रव्यवहाराणां स्वत्व– व्यहवहारः दृश्यते। क्रयविक्रयादिदर्शनात्, अपि नियतोपायकं स्वत्वं लोकसिद्ध एव इति न्यायविदः स्वीकुर्वन्ति। पुनश्च क्रतु सिद्धिः सिद्धर्थं द्रव्यार्जननियमातिक्रमेणार्जितेन अपि द्रव्येण क्रतुसिद्धिः न भवति। न पुरुषस्य नियमातिक्रमदोषः स्वत्वस्य लौकिकत्वात् इति मीमांसकानां सिद्धान्तः। एतेन चौर्यादिलब्धधने स्वत्वं न स्यात् इति न मन्तव्यां तत्र लोके अपि स्वत्वप्रसिद्धि अभावात्। तस्मात् गौतमोक्तं स्वत्वसाधनं सूत्रं स्वत्वहेतुरूपेण लोकसिद्धं अपि अनुवादत्वेन अनुग्रीहीतम्। अतः स्वत्वं लौकिकनियतोपायकं च इति विज्ञानेश्वेरण स्वीकृतम्।

साम्प्रतम् नीर्णणीयते किं स्वत्वं विभागात् अथवा स्वस्य सतो विभागः इति। तत्र विभागात् स्वत्वं इति उक्तं। जातपुत्रस्य आधनविधानात् यदि जन्मना एव स्वत्वं स्यात् तदा उत्पन्नस्य पुत्रस्यापि स्वत्वं साधारणं इति द्रव्यसाध्येषु आधानादिषु पितुः अनधिकारं स्यात्। विभागात् प्राक्पितृप्रसादलब्धस्य विभागप्रतिषेधः नियुत्पद्याते यतोहि सर्वानुमत्यादनत्वाद् विभागप्राप्तिः अभावात् यथोक्त नारदः–

शौर्यभार्याधने चोभेयच्च विद्याधनं भवेत्। त्रीण्येतानि विभाज्यानि प्रसादो यच्च पैतृकः॥ तथा च-भर्ता प्रीतेन यद्धनं स्त्रियै तस्मिन्मृतेऽपि तत्। सा यथाकामश्नीयात् दद्यात वा स्थावराद्दते॥ इति कृतिदानं वचनं च नोपपद्यते जन्मना स्वत्वे। न च स्थावराद्दते यद्दत्तं इति सम्बन्धयुक्तः व्यवहितयोजना प्रसङ्गात् यद्यपि–

मणिमुक्ताप्रबालानां सर्वस्यैव पिता प्रभुः।
स्थावरस्य तु सर्वस्य न पिता न पितामहः॥

इति स्थावरस्य प्रसाददानप्रतिषेधवचनं तत् पितामहोपात्त स्थावरविषयं। अतीते पितामहे तत् धनं पिता पुत्रयोः साधारणं अपि मणिमुक्तादि पितुः एव, स्थावरं तु साधारणं इति एतत्स्मात् एव वचनात् अवगम्यते। तस्मात् न जन्मना स्वत्वं किंतु स्वामीनाशात् विभागात् वा स्वत्वं इति विज्ञानेश्वरेण उक्तम्-(05) यदि विभागात् स्वत्वं स्यात् तर्हि चौराणामपि चौर्यधिनस्य विभागानन्तरं स्वर्त्वमापद्यते।

अतः विभागात् न स्वत्वं, परन्तु स्वत्वे सति विभागः इति विज्ञानेश्वरस्य मतं वर्तते। लोके पुत्रादिनां जन्मना एव स्वत्वं प्रसिद्धतरम्।

पुनश्च विज्ञानेश्वरः जन्मना स्वत्वं पक्षं दृढ़ीकर्तुं गौतमवचनं उपस्थापयति–गौतमसूत्रं–

"उत्पत्यैवार्थस्वामीत्वं लभेतेत्याचार्याः" अर्थात्– उत्पत्या नाम उत्पत्तिमात्रेण नाम जन्मना एव निश्चितार्थे स्वामीत्वं अधीकारत्वं जायते इति आचार्याः निगदन्ति। पुनश्व विज्ञानेश्वरेण उक्तं– "मणिमुक्ताप्रबालानां इत्यादिवचनं जन्मना स्वत्वं पक्षे एव वर्तते। न च पितामहोपात्तस्थावरविषयं इति युक्तं, न पिता न पितामह इति वचनात्।

पितामहस्य स्वार्जितं अपि पुत्रे पौत्रे च सति अदयं इति वचनं जन्मना स्वत्वं बोध्यते। "भर्ता प्रीतेन" इत्यादिवचनेन विष्णुः स्थावरस्य दानज्ञापनं तत् स्वोपार्जितं अपि पुत्रादि अभ्यनुज्ञा एव इति। तस्मात् पैतृके धने जन्मना एव स्वत्वं तथापि पितुः आवश्यकेषु धर्मकृतेषु वाचनिकेषु प्रसादान–कुटुम्ब भरणपोषणादिमुख्यादिषु च स्थावरव्यतिरिक्तद्रव्यविनियोगे स्वातंत्र्यं अस्ति इति। पुनश्च ये जाता येप्यजाता ये च गर्भेव्यवस्थिताः। वित्तं च ते अभिकांक्षति न दानं न च विक्रयः। इति वचनं जन्मप्रभृत्येव स्वत्वं सुदृढ़ं प्रतिपादयति। एवं च

प्रकारेण विभिन्नाः पक्षाः समुपस्थाप्य विज्ञानेश्वरः जन्मना स्वत्वं प्रतिपादयति, अपरं च स्वत्वे सति विभागः इति पक्षं साधयति, एतेन प्रतिपाद्यते विज्ञानेश्वरो जन्मस्वत्ववादस्य महान् पक्षधरः इति।

- **धनविभागकालः** इदानीम् धनविभागकालः विचार्यते। अत्र प्रसङ्गे[6] याज्ञवल्क्यवचनमुत्थाय तस्य श्लोकस्य अर्थव्याख्या प्रसङ्गक्रमे पितुः धनं विभागार्थं त्रयः कालाः विज्ञानेश्वरेण प्रतिपादिताः। अत्र प्रसङ्गे गौतमधर्मसूत्रात् त्रीणि सूत्राणि तेन उत्त्थापितानि "उर्ध्वं पितुः पुत्राः रिक्थं विभजेरन्"[7] इति गौतम वचनात् पित्रोः मरणानन्तरं पुत्राणां इच्छ्या एकः धनविभागकालः भवति, द्वितीयधनविभागकालः गौतमवचनानुसारं यथा– "निवृत्तेचापि रजसि"[8] अर्थात् मातरि निवृत– रजस्कायं पितरि धननिस्पृहे तद् अनिच्छया अपि पुत्राणां इच्छया धनविभागः कर्तव्यः। तृतीयधन–विभागकालार्थं गौतमवचनं यथा– "जीवति चेच्छति"[9] अर्थात् पितरि जीवति तदिच्छ्यापि धनविभागः कर्तव्यः। विभागसमये जेष्ठं जेष्ठभागेन, मध्यमं मध्यमभागेन, कनिष्ठं कनिष्ठभागेन अथवा सर्वान् च पुत्रान् समभागेन विभागः कर्तव्यः। अत्र प्रसङ्गे विज्ञानेश्वरेण मनुवचनं उद्धृतं यथा– यद्यपि अत्र विज्ञानेश्वरः धनविभागार्थं त्रयः कालाः प्रतिपादिताः तथापि मातुःनिवृत्तरनजस्कत्व विशेषणं पितामहधनविभागपरं न तु पितृधनपरं इति तस्य अभिप्रायः। यत्र विषमभागः वा विभागः भवति तत्र स्वार्जितद्रव्यविषयप्रसङ्गः वर्तते। यदि श्रेष्ठभागादिना ज्येष्ठादीनि विभजति तदा पत्न्यः श्रेष्ठादिभागान् न लभते किंतु उद्धृत्वाधारात् समुदायद्रव्यात् समान एव अंशान् लभन्ते। यदि धनस्वामी स्वेच्छ्या सर्वान् एव पुत्रान् समविभागिनः करोति तदा पत्न्यः पुत्राः समानभागा कर्तव्या। यासां पत्नीनां भर्ता, स्वशुरेण वा स्त्रीधनं न दत्तं, दत्ते त्वर्धं प्रकल्प्यते।

- **पितामहधने पितुःभागकल्पना:** अत्र प्रसङ्गे मिताक्षराकारः याज्ञवल्क्यवचनं उत्थापयति यथा–[10]

भूर्यापितामहोपत्ता निबन्धोद्रव्यमेव वा। तत्र स्यात् सदृशं स्वाम्यं पितुः पुत्रस्य चोभयोः॥ अर्थात् पिता पुत्रयोः समांशकृतनात् न विषमविभागः कर्तव्यः। नात्र पितुः अंशद्वयं न वा केवलं धनविभागौ पितुः इच्छा नियामिका भवति। अविभक्तेन पित्रा पितामहधने दीयमाने विक्रीयमाने वा पौत्रस्य निषेधेऽपि अधिकारः अस्ति। परन्तु पित्रार्जिते निषेधाधिकारः नास्ति। कथं इति परतंत्रत्वात्। परन्तु विक्रयादि अर्थं अनुमतिः गृहीत्व। पैतृके धने पितामहे-धने यद्यपि स्वाम्यं जन्मना एव वर्तते तथापि पितृधने पितृपरतन्त्रत्वात् पितुःच अर्जकत्वेन प्राधान्यात् पित्रा विनयुज्यमाने स्वार्जितधने पुत्राणां अनुमतिः कर्तव्या। किन्तु पितामहधने पितापुत्रयोः द्वयो? स्वाम्यं अविशिष्टं इति निषेधाधिकारः अस्ति इति विशेषः वर्तते। अत्र मिताक्षराकारेण मनुवचनं उत्त्थापितं यथा–

पैतृकंतु पितािद्रव्यमनवाप्तं यदा पुनयात्।
न तत पुत्रैर्भजेत सार्धमकामः स्व्यमार्जितम्॥[11]

- अविभाज्यधनानि–

अत्र प्रसङ्गे याज्ञवल्क्यवचनं यथा–[12]
पितृद्रव्याविरोधेन यदन्यतस्वयमर्जितम्।
मैत्रमौद्वाहिकं चैव दद्यादानां न तद्भवेत्॥
क्रमादभ्यागतंद्रव्यं हृतमप्युद्धरेत्तु यः।
दयादेभ्यो न तदद्यायात विद्यया लब्धमेव च॥

इति वचनात् मातापितरोः द्रव्याविनाशेन यत् स्वमार्जितम् मित्रसकाशात् यत् लब्धं औद्वाहिकं धनं तत्त सर्वं अविभाज्यानि। हृतद्रव्यं यः उद्धरति अर्थात् उद्धरता तस्मिन् क्षेत्रे तूरीयांशं लभते। अवशेषं तु सर्वेषु भ्रातृषु समभागेन विभज्यते। अत्र प्रसङ्गे विज्ञानेश्वरः शंख वचनं उद्धृतं यथा–
पूर्वंनष्टां तु यो भूमिमैकश्च उद्धरेत् क्रमात्। यथाभागं लभन्ते अन्ये दत्त्वाशंतु तुरीयकम्॥ पुनःच युद्ध–भार्या–विद्यार्जित–धनानि नारदवचनानुसारं अविभाज्यानि। धनविभागात् पूर्वं वस्त्र–वाहनालंकारादि यः येन धृतः तत् धनं तस्यैव भवत्ति त्तत धनं न विभज्यम्।
पितृधृतवस्त्राणि पितृउर्ध्वेगते श्राद्धभोक्रे दातव्यानि कृतान्नं उदकं स्त्रीश्च अविभाज्यानि। स्त्रीयः नाम दास्यादयः विषमाः चेत् वर्ज्याक्रमेण कर्म कारितव्या। वाहनमश्वसिविकादि येन आरुढ़ तत् तस्य एव। अपि च गृहारामदिषु प्रचारः नाम प्रवेश निर्गममार्गाः अविभाज्याः। अत्र विज्ञानेश्वरं अविभाज्यधनप्रसङ्गे मनु वचनं उद्धृतं यथा–

वस्त्रपत्रमलंकारं कृतान्नमुदकंस्त्रीयः।
योगोख्यप्रचारं च न विभाज्यं प्रचक्षते॥
(मनुस्मृ०-9-219)

तथा च विद्यया अर्थात् वेदाध्ययनाध्यापनेन वेदार्थख्यापनेन च यत् लब्धं तदपि दायादेभ्यः न दद्यात्। अर्जक एव तत् सर्वं

गृह्णीत्। विद्याधनस्य अविभाज्यस्य लक्षणं उक्तं कात्यायनेन–

परभक्तोपयोगेन विद्याप्राप्तान्यस्तु या।
तथा लब्धंधनं यत्तु विद्याप्राप्त तदुच्यते॥

मनुना अपि। अस्मिन् प्रसङ्गे मिताक्षराकारेण उद्धृतम्–

अनुपध्नन्पितृद्रव्यं श्रमेण यदुपार्जितम्।
दायादभ्यो न दद्यात्विद्ययालब्धमेव च॥

इति श्रमेण सेवायुद्धादिना ननु पितृद्रव्याविरोधेन यन्मैत्रादिलब्धं तत्तस्यैव नान्येति प्रसिद्धम्।

- **सवर्णभ्रातृधनविभागः** पिता यदिधनं विभक्तुमिछति तदा सः समविषम वा भागैः कर्तुमशक्नोति। अर्थात् पिता यदा ज्येष्ठस्य विंशोधारादिकं कृत्वा विभजति अथवा सर्वान् एव पुत्रान् समानांशांन् कुर्यात्, तदा जीवन्तीनामलब्धस्त्रीधनानां पत्नीनां अपि तत्जातीयपुत्राणां समांशं दद्यात्। लब्धस्त्रीधनानां तु पुत्रांशस्य अर्धं प्रकल्प्यत् इति उक्तम्। अत्र अर्धपदस्य यावतादत्तेन पुत्रः समांशः भवति तावददेव दद्यात्। पितरि मृते भ्रातृभिः विभागसमये माता यदि स्पष्टगर्भा तर्हि तस्याः प्रसवकालं प्रतीक्ष्य विभागः करणीयः। स्पष्टगर्भा चेत् मातृणां प्रतिश्वीकेषु भागेषु तदुत्थामायं च ऋणं अपण्य अवशिष्टेभ्यः स्वेभ्यः भागेभ्यः किंचित्-किंचित् उद्धृत्य विभागानन्तरं जातस्य भागः स्वभागसमः कर्तव्य इति।

पुनश्च पितरि प्रेते विभजदभिः भ्रातृभिः असंस्कृताः भ्रातरः समुदायद्रव्येण संस्कर्तव्या। सा च याः च भगिन्यः असंस्कृताः ताः अपि भ्रातृभिः निजात्-निजात् अंशात् चतुर्थं अंशंदत्वा संस्कर्तव्याः यथाह याज्ञवल्क्यः–
"असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतेवे।" यथा– यदि कस्यचित् ब्राह्मणस्य सवर्ण– भार्यायां पुत्रः एकः कन्या चैका तत्र पितृद्रव्यं द्विघाविभज्य तत्रैकं भागं चतुर्धाविभज्य तुरीयमांशं कन्यायै दत्वा शेषं द्वौपुत्रौ विभज्य गृह्णयात्।
अथ एकः च पुत्रः द्वे कन्ये तदा पितुः धनं त्रिधा विभज्य एकं चतुर्धाविभज्य द्वौ भागौ द्वाभ्यां कन्याभ्यां दत्वा सर्वं अवशिष्टं पुत्रः गृहणीयात्। इति समानजातीयेषु समविभागेषु भ्रातृषु भगनीषु च योजनीयं। अपि च यः पुत्रः स्वयमेव द्रव्यार्जने समर्थः पितृधनं च अच्छतः अपि तस्मै किंचित् असारमपि द्रव्यंदत्वा विभागः पित्रा कर्तव्यः इति विज्ञानेश्वरस्य "शक्तस्यानीहमानस्य किंचित् दत्वा पृथक् क्रिया" इति याज्ञवलक्यस्य वचनोपरि मतं वर्तते। अत्र प्रश्नः समुदेति यदि पुत्रः पितुः धनात् किंचित् नेतुम् नेच्छति तर्हि कथं तस्मै असारंमपि द्रव्यं दीयते। अत्र उच्यते भ्रातृषु एकत्र निवसत्सु यदि कश्चित् भ्राता निरोगः सबलः कर्मदक्षः च भूत्वा आलस्यात् किमपि कर्म कर्तुम् अनुद्यतः भवति तर्हि किंचित् उपजीवनं तत्काले जीवनार्थे द्रव्यं दत्वा निर्विभागः अर्थात् भागहीनः कर्तव्यः अर्थः समीचीनः वर्तते।

- **असवर्णभ्रातृविभागः–** वयं जानीमः ब्राह्मणस्य चर्तुवर्णेषु क्षत्रियस्य त्रिषु वर्णेषु वैश्यस्य द्वयोः शूद्रस्य शूद्रवर्णे एव विवाहः कर्तव्यः। तत्र ब्राह्मणेन ब्राह्मण्यां उत्पन्नाः पुत्राः चतुर्भागान्, क्षत्रियायां उत्पन्नाः पुत्राः त्रीन् भागान्, वैश्यायां उत्पन्नाः पुत्राः द्वौ भागौ, शूद्रायां च एकं भागं गृह्णीयुः। अतश्च वर्णे-वर्णे ब्राह्मणोत्पन्नः यथाक्रमं चतुः, त्रीणि, द्वौ, एकं भागाः भवेयुः। यद्यपि चतुः त्रिद्वेक भागाः इति विशेषेण उक्तं तथापि प्रतिग्रहप्राप्त भूव्यक्तिरिक्तविषयं एम्। अत्र अयं विशेषः यत् प्रतिग्रह लब्धाभूमिः क्षत्रियादिपुत्रैः न ग्रहणीया। परन्तु पिता यदि स्नेहेन प्रयच्छति तर्हि पितरि प्रेते विप्रापुत्रः गृहणीयात्। अस्मिन् प्रसङ्गे विज्ञानेश्वरेण बृहस्पतिवचनं उद्धृतं यथा–

न प्रतिग्रहभूर्देया क्षत्रियादिसुताय वै। यद्यप्येषां पितादद्यान्मृते विप्रासुतो हरेत इति पुनश्च "शूद्र्यां द्विजातिभिः जातो न भूमेर्भागमर्हति।" इति देवल– वचनात् ब्राह्मण–क्षत्रिय–विंश–शुद्रापुत्रः रिक्थभाक् भवितुम् न अर्हति। यदि पिता प्रसादधनरूपेण किमपि तस्मै ददाति तत् तस्य एव धनं। परन्तु यदा प्रसाददानं नास्ति तर्हितस्य एकांशभागित्वं सिद्ध्यति। नाधिकं दशमद्द्याच्छूद्रा पुत्राय कर्हिचिदित मनु[13] वचनात्।

औरसादीनां पुत्राणां भागकल्पना–

शास्त्रेषु द्वादशपुत्राणां वर्णनं वर्तते, अर्थात् द्वादश पुत्राः सन्ति। ते द्वादशपुत्राः यथा–[14]

औरसः क्षेत्रजश्चैव दत्तः कृत्रिमः एव च।
गूढोत्पन्नोऽपिविद्धश्च दयादा बान्धवाश्च षट्॥

कानीनश्च सहोढ़श्च क्रीतः पौनर्भवःतथा।
स्वयंदत्तश्च शौद्रश्च षडदयादबान्धवाः॥

एषु "कवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः" इति मनुवचनात् औरसः पुत्रः पितुः दाये मुख्याधिकारी भवति। अपरे ये

क्षेत्रजादयः पुत्राः सन्ति तेषां अनुकल्पनां गुणवत्तां च कश्चन भागः परिकल्पितः अर्थात् क्षेत्रजः पुत्रः यदि निर्गुणः सन् औरसपुत्रस्य प्रतिकूलः भवति, तर्हि पितुः धनस्य षष्ठांशं निर्गुणत्वं प्रतिकूल्योः एकतरसद्भाभा पञ्चमांशं गृह्णीयात् इति। उपरोक्त वचनानुसारेण आद्य षड् पुत्राः दायहराः। अन्याः षड्पुत्राः ग्रासाछादनभागिनः भवन्ति इति। आद्य षड्पुत्रेषु प्राधान्यं प्राथम्यं च औरसस्यैव वर्तते। तस्य धर्मत्वात्। पुत्रिकापुत्रः औरसपुत्रसमः भवति। अत्र प्रसङ्गे मनुवचनं यथा–

पुत्रिकायां कृतायां तु यदि पुत्रोऽनुजायते।
समस्तत्र विभागः स्यात् ज्येष्ठता नास्ति हिस्त्रियाः ॥[15]

इति मनुवचनात् अन्येषां क्षेत्रजादीनां पूर्वपूर्वाभावे चतुर्थींश भागित्वं स्वीक्रियते। अर्थात् सत्यप्यौरस पुत्रे क्षेत्रजदत्तकादिसवर्णपुत्राश्चतुर्थांश हरा:भवन्ति। कानीनादयश्च केवलं ग्रासाछादन– भागिनः इति विज्ञानेश्वरः। पुत्रिका पुत्र प्रसङ्गे विज्ञानेश्रेण उक्तं-पुत्रिकायाः सुतः पुत्रिकासुतः षष्ठी समास निष्पन्नत्वात् औरसः समः वर्तते। प्रसङ्गेस्मिन् तेन वशिष्ठवचनं उद्धृतम् यथा–

अभातृकां प्रदास्यामि तुभ्यं कन्यामलंकृताम्।[16]
अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति॥

पुनश्च पुत्रिका पुत्रस्य द्वितीय अर्थः तेन कृतं यथा-पुत्रिका एव सुतः पुत्रिकासुतः कर्मधारय समासेन सः अपि औरसः समः एव। पित्रवयवानामल्पत्वात् मात्रवयवानां च बाहुल्यात्। प्रसङ्गे अस्मिन् मिताक्षराकारेण वशिष्ठवचनं उद्धृतं यथा– “तृतीय पुत्रिकैव” इति अर्थ:। पुत्रिकायां कृतायां यदि पुत्रः अनुजायते तत्र औरसपौत्रिकयोः सम विभागः कर्तव्यः। परन्तु औरसपुत्रे उत्पन्ने अन्येसुताः चतुर्थांशहराः सवार्णाः दत्तक क्षेत्रजादयः एते सर्वे चतुर्थांशहराः कानीनगूढ़उत्पन्नसहोढ़जपौनभवाः एते असवर्णाः औरसे सति न चतुर्थांशहराः परन्तु ग्रासाछादनभाजनाः। अत्र प्रसङ्गे कात्यायनं वचनं विज्ञानेश्वरेण उद्धृतं यथा–

उत्पन्ने त्वौरसे पुत्रे चतुर्थांशहरा सुताः।
सवर्णा असवर्णास्तु ग्रासाछादनभाजनाः॥

- **अपुत्रधनाधिकारिणः** पुं नाम नरकात् त्रायते यस्मात् पितरम् सुतः। तस्मात् पुत्रः इति प्रोक्तः स्वयमेव स्वयंभूवा॥ यस्य औरसादयः द्वादशविधाः पुत्राः न सन्ति स अपुत्रः। अत्र पुत्रपदेन पुत्र–पौत्र–प्रपौत्रादयः इति ज्ञायते। यस्य पुत्रः नास्ति तस्य धने कस्य अधिकार: अस्ति इति अपेक्षायां वा जिज्ञासायां उच्यते यत् तत्र प्रथमं तावत् पत्नी अधिकारिणी भवति। अपुत्रस्य धनग्रहणे क्रमः योगिश्वरेण याज्ञवल्क्येन दर्शितिः यथा–

पत्नीदुहितरश्चैव पितरौ भ्रातरस्तथा।
तत्सुता गोत्रजाबन्धुशिष्यसब्रह्मचारिणः॥

एषामभावे पूर्वस्य धनभागुत्तरोतरः।
स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिः॥

इति अनयो: याज्ञवल्क्यवचनयोः एतद्ज्ञायते यत् अपुत्रस्य मृतस्य धनं प्रथमं तावत् पत्नी प्राप्नोति। एषां पत्नीयादिनां अनुक्रान्तानां नाम पूर्वके पूर्वस्य-पूर्वस्य अभावे उत्तरोतरस्य धनभाकत्वं सम्बन्धः प्रतिपाद्यते। अत्रापि सर्वेषु मूर्धावसिक्तादिषु अनुलोमजेषु प्रतिलोमजेषु वर्णेषु च ब्राह्मणादिषु अयं दायग्रहण– विधिः दायग्रहणक्रमः वेदितव्यः इति विज्ञानेश्वरेण प्रतिपादितम्।

**संदर्भ–सूची**


1. याज्ञ०स्मृ०, पृ० 216 मिताक्षरायां
2. याज्ञ०स्मृ०, पृ० 216
3. तत्रैव
4. गौ०ध०सू०– (10/39–42)
5. याज्ञ०स्मृ०, पृ० 218
6. याज्ञ०स्मृ०– 2/114
7. गौ०ध०सू०– 28–1
8. गौ०ध०सू०– 28–2
9. याज्ञ०– 2–12
10. मिताक्षरायां– 9–209
11. मिताक्षरा, पृ० 214
12. मनु स्मृ०– 9–144
13. मनु स्मृ०– 9/159–160
14. मनु स्मृ०–
15. मिता, पृ० 234
16. मिताक्षरायां– 236